IJRAR.ORG E-ISSN: 2348-1269, P-ISSN: 2349-5138
INTERNATIONAL JOURNAL OF RESEARCH AND ANALYTICAL REVIEWS (IJRAR) | IJRAR.ORG
An International Open Access, Peer-reviewed, Refereed Journal

# संस्कृतसाहित्येषु मृगपक्षीणां भावाभिव्यक्तिः

**शरदा. ए,** शोधच्छात्रा, कर्नाटकसंस्कृतविश्वविद्यालयः

शोधसारः

अज्ञानिनां कालज्ञानरहितानां भोजनमैथुनादिकासक्तानां मृगाणां मनुष्यैः सह भावाभिव्यक्तित्व दर्शनस्य उल्लेखः अनेकेषु काव्येषु साहित्येषु सन्ति । मृगपक्षिणः स्नेहप्रकटनेन उपकरोति । तस्य विशिष्टोदाहरणानि साहित्येषु भवन्ति । मुख्यतया नैषधीययचरितम् रघुवंशकाव्यम् ,अभिज्ञानशाकुन्तलम् एताद्दशकाव्येषु दर्शितानां मृगपक्षिणाम् उल्लेखः श्लोकेन सह दर्शितः ।

तद् यथा- प्रेमीनां परस्परप्रेमप्रकटनाय द्वयोर्मेलनाय साहाय्यं करोति नैषधीयचरिते हंसः ।, पतिगृहगमनाय सिद्धतां कुर्वतीं दृष्ट्वा कार्ये स्तब्धाः भवन्ति मृगाः । ,शोकात्वात् श्लोकमागतम् इति क्रौञ्चमिथुनस्य कारणम् । रघुवंशस्य पुत्रविहीनस्यदिलीपस्य कथायां गतः धेनोः नन्दिन्याः अनुग्रहःभवन्ति। तस्मात् भावाभिव्यक्तेः केचन श्लोकाः अर्थेन सह उल्लेखनं अत्र कार्यम् ।

**<u>प्रज्ञानवनवोल्लेखशालिनी प्रतिभामता</u>**

तदनुप्राणनाजीवद्वर्णना निपुणः कविः | तस्य कर्म स्मृतं काव्यं "कविकर्म काव्यम्" इति । तच्च काव्यं सरससरलसमयोचितचतुरोक्त्या, हावभावेन साहित्यं, कान्तासम्मिततया रमणीयशब्दार्थेन मानवं परवशं कारयति तेन च नीतिबोधं जनयति । एतेन पठनावसरे लालित्यं पठितारः अनुभवन्ति । समस्तपदेन शब्दसौन्दर्यं अधिकं भवति चेत् काव्ये ओजोगुणः सिध्यति। मृदुतया मनोहरशैल्या च काव्यम् अस्ति चेत् तत्र माधुर्यगुणः सिध्यति। कव्येषु नवरसः भवति । तस्य नवरसस्य वर्धने मृगपक्षिणां पात्रं अत्यधिकम्। तस्मात् च कलामयरूपं काव्यं भवति । यस्मिन् सहित्ये मृगाणां पक्षीणां च उल्लेखो वर्तते तस्मिन् तेषां भावाभिव्यक्तिराधिक्येन दृश्यते। काव्येषु नवरसस्य रसवर्धने सहायाकाः भवन्ति मृगपक्षिणः। मुख्यवैशिष्ट्यं मृगपक्षीणां स्वभावः । अतः सरसरमणीयताः अलङ्कारप्रपञ्चे मुख्यपात्रं वहन्ति । तस्मात् साहित्यिकरीत्या मृगपक्षिविषये अनेकेषु काव्य-नाटक-महाकाव्येषु उल्लिखिताः सन्ति।

**" जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः "।–भर्तृहरिः**

अत्र निर्दिष्टकाव्येषु समुल्लिखितानां मृगपक्षीणां भावात्मकाः उल्लेखाः प्रदत्ताः सन्ति ।

**"पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव।" गाथासप्तशति**

अत्रत्यसन्दभणः - कर्लदलेप्रशान्तपररसरेश्वेतबलाकपक्ष्येकं उपनवशनत। अनविलः पक्षी अस्ति । सः स्थावरजगति निश्चल-प्राशान्तपरिसरे अन्तर्भूतः कामुकः। सः कामुकव्यवहारस्य बन्धनस्य सन्निवेशं दर्शयति । काचित् कामिनी प्रियेनेताम् उक्तिं

वाचयति । एतादृशेषु सन्दर्भेषु पक्षिणः स्वभावः एवः कारणीभूतः भवति । पक्षेः गुण: सन्दर्भोचितस्य कल्पनार्थं साहाय्यं भवति।

श्रीहर्षस्य नैषधीयचरिते, भारवेः किरातार्जुनीये, कालिदासस्य अभिज्ञानशाकुन्तले तथा अनेकेषु सहित्यग्रन्थेषु मृगपक्षीणां अभिव्यक्तिः दर्शितः।

- **आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युस्वः**

**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥८/ 4 .अ./अभि .शा।**

- **उद्गलितदर्भक कवला मृग्यः परित्यक्त नर्तना मयूराः ।**

**उपसृतपाण्डुपत्रा मुञ्चत्यश्रुणीव लताः ॥११। च .अ./अभि .**

- **यस्य त्वया व्रणविरोपणमिङ्गुदीनानां**

**तैलं न्यषिच्यतमुखे कुशसूचिविद्धे ।**

**परिवर्धितको श्यामाकमुष्टिपरिवर्धितको जहाति**

**सोयं न पुत्रकृतकः पदवीं मृगास्ते ॥१३/ 4 .अ./अभि .शा।**

अभिज्ञानशाकुन्तले शकुन्तलायाः पतिगृहगमनसमये वनस्य मृगपक्षीणां दुः स्थितिः उल्लिखिता। कण्वमुनेः आश्रमवासी शकुन्तलां पतिगृहगमनां मृगपक्षिसखीं दृष्ट्वा मयूराणां नर्तनं स्थगितम् । मृग्यः दु:खतप्ता: अभवन् । मृगाणां पक्षीणां च स्नेहस्य स्पन्दनं अत्र दृश्यते । अज्ञानिनः चेदपि मृगपक्षिणः स्नेहभावः सर्वेषु जीवेषु विद्यते इत्यवगम्यते ।

न केवलं मनुष्याणाम् अपि तु मृगाणाम् अपि भावाभिव्यक्तिः भवतीति अवगम्यते ।

नैषधीयचरितम् श्रीहर्षेण विरचितम्। तत्र मुख्यतया नल-दमयन्त्योर्विवाहे सेतु इव कार्यं हंसेन कृतम्। यथा निषधदेशराजा पुण्यश्लोक: सर्वविद्यापारङ्गतः कुण्डिनगर्याः विदर्भराजकुमारीं

दमयन्तीं अप्रतिमसुन्दरीं परिणेतुं उद्युक्तः अभवत् । तस्मिन् सन्दर्भे दमयन्तीं स्नेहप्रकटनमार्गम् अजानन् नलः वाटिकायां उपविशन् विद्यामनसरोवरे तरन्तं हंसमेकं गृहीत्वा हस्ते मर्दनं करोति। तदा नलमुद्दिश्य सः हंसः स्वस्य मरणस्थितिं ज्ञात्वा भावाभिव्यक्तिं इत्थं करोति।

श्रीहर्षविरचित-नैषधीयचरिते भैमीसौन्दर्यपीडितहंसस्य कथनम् नलस्य कृते ।

- **इतीद्रुशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्य** कृपं **नृपं खगाः।**

**दयासमुद्रे स तदा शये तिथीचकार कारुण्यरसापगिर**:134 ।**नै .स**.1

नलः काममोहितः उद्याने विहारं कुर्वन् यदा हंसं गृह्णाति तदा सः हंसः करुणया याचति नलम् इत्थं - “भवतः ईदृशमर्दनेन मम माता जरातुरा सा अनाथा भविष्यति मम पत्नी पतिपारायणा सा अपि अनाथा भविष्यति” इति।

- **मदेकपुत्रा जननी जनातुरानयप्रसूतिवरटातपस्विनी ।**

**गतिस्तयोरेव जनस्तनमर्दयन्नहो विधे** ! **त्वां करुणा रुणद्धि न॥**135॥**नै च.स १**

“मम सखा, मित्राणि, पक्षिणः मम मरणानन्तरं किञ्चित् कालं रोदनं कृत्वा गच्छन्ति अनन्तरं

मम गतिः ?” इति नलपीडितस्य हंसस्य प्रश्नः नलाय।

- **कथं विधातर्मयि पाणिपङ्कजात्तवप्रियशैत्यमृदुत्वशिल्पिनः ॥**138॥**नै.स** .

मां विना तव जीवनं शून्यं भवति । यतो हि मम मरणवार्तां शृणोति मम मित्रात् । अद्य आरभ्य शून्यमेव पश्यति इति भाव।।अत्र हंसस्य कुटुम्बस्य चिन्तनं कथम् भवतीति अवगम्यते ।

- **अयि स्वयूथैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं वतोदिता ।**

**मुखानि लोलाक्षि ! दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ।139॥नै ,स 1**

हंसस्य कुटुम्बस्य कीदृशी स्थितिः इत्यपि अवगम्यते । यतः अहम् मरणं प्रप्स्यामि चेत् भवती अपि मरणं प्राप्स्यति तदा मम द्वितीयवारं मरणं भवति । यतोहि भवत्याः मरणानन्तरं मम शिशवः अपि पोषकयोः अनुपस्थितौ मरणं प्राप्नुवन्तीति ” एकशोकन’ इति पाठः।

- **ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि! विपद्यते यदि ।**

**तदास्मि दैवेन हतोपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥140॥नै . स ।**

बहुकालं त्वया जीवनीयम् आसित् किन्तु मरणं प्राप्स्यति। नदीतटे क्रीडनम् इतः परम् तद् नास्तीति दुखितः भवति । शोकेन शोकस्य परिधिः अवगामयति । तद् कविना सुन्दरतया निरूपितम् ।

- **आनन्दजाश्रुभिरनुश्रियमाणमार्गान् प्राक्शोक निर्गमितनेत्रपयः प्रवाहान्।**

**चक्रे स चकनिभचङ्क्रमणच्छलेन नीराजनां जनयतां निजबान्धवानम्॥**144।**नै**.**स**1

नलेन मुञ्चितस्य सन्तुष्टस्य हंसस्य शरीरस्य विकारः दर्शितः। सन्तोषस्य पारं स्वस्य शरीरं उत्पुल्य उत्फ्ल्य गमनम् सन्तोषस्य अभिव्यक्तिं शरीरस्य विकारेण दर्शयति हंसः।

भवतः प्रियं करिष्यामि इति दृष्टान्तेन सूचयति ।नलप्रेषितस्य भैमीदृष्टहंसदूतस्य वाक्यम्।

- **अचिरादुपकर्तुराचरेदथ वात्मौपयिकीमुपक्रियाम्।**

  **पृथुरित्थमथाणुरस्तु सा न विशेषे विदुपामिह ग्रहः ॥**14**॥**

उपमां दत्वा भवतः सहाय्यं करोमि इति हंसस्य वाक्यं नलाय।

अत्र हंसः तस्य दुखं अवगम्य यथा स्नेहः तथा तस्य दुखः न भवतु इति विचिन्त्य-

- **दमनदमनकप्रसेदुपस्तनयां तथ्यगिरितपोधनात्।**

**वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयाम्॥**17**॥नै**. **स**.2

हंसेन भैमीलोकोत्तरसौन्दर्यवर्णनम्-

- **अधरं किल बिम्बनामकं फलमस्सदिति भव्यमन्वयम् ।**

**लभते धरबिम्बमित्यदः पदमस्या रदनच्छेदं वदत् ॥**24**।नै**. **स** .2

हंसेन सानुरागं नलवर्णनम्-

- **तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य।**

**अजातपाणिग्रहणासि तावद्रूपस्वरूतिशयाश्रयश्च ॥**47**॥ नै .स**. 3**॥**

सहजसौन्दर्येण नलप्राप्तिरपि तव सम्भाव्यत इति हंसस्य अश्वासनम्-

- **निशा शशङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।**

**विधेरपि स्वारसिकः प्रयासः परस्परयोग्यसमागमाय ॥48॥नै. स.3॥**

यथा निशा चन्द्रेन सह ,शिवपार्वत्या सह, लक्ष्मीनरायणेन सह मिलिता तथा भवतोः मेलनं भविष्यति शिघ्रम्। विवाहः भविष्यति इति आश्वासनम्। इदं हंसेन कृतं दूतकार्यं नलदमयन्त्योः विवाहे ।

कोकिलकूजनम् कव्येषु यथा-

- **भास्करो दयकालो यं गता भगवती निशा ।**

**असौ सुकृष्णौ विहगः कोकिलस्तात कूजति ।"-रामायणम् -2,52.2"**

- **गायन्तोगलरागमङ्कुर-रससूतस्य चाञ्चुक्षते क्षोतद्भिः**

**शिशिरोपरोधशिथिलं पुष्णन्ति पुष्कोकिला॥**

- चूताङ्कुरस्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चूकुज कुमारसम्भव **3,32** ।

- **नृत्यतीव महव्यूहः परेषां भयमादधत्।**

**क्रौञ्चपृष्टारुणं रौद्रं बाणजालं व्यदृश्यत ।**

**नैव सूर्यप्रभा राजन् न दिशः प्रदिशस्तथा ॥म भा.8.51.60.66**

महाभारतयुद्धसन्दर्भे युद्धव्यूहं क्रौञ्चरुणं पृष्टं बाणजालस्य विषये उक्तम्

**मेघसन्देशस्य सन्दर्भे-**

रामायणस्य आरम्भः क्रौञ्चपक्षीतः । अतः तादृशः शोकः श्लोकत्वम् आगतः ।

मिथुने रतस्य क्रौञ्चं ददर्श वाल्मीकिः ।

**तस्याभ्यासे तु मिथुनं चरन्तमनपायिनाम्।**

**ददर्श भगवान् तत्र क्रौञ्चयोर्चारुनिःस्वन म् ॥९ बा. २ स रा.**

तस्मिन् व्याधेन हतः एकः ।

पतितं पतिं दृष्ट्वा क्रौञ्ची शोकतप्ता जाता -

- **तं शोणीतपरीताङ्गं चेष्टमानं महीतले ।**

**भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥११ बा. २ स रा.**

तद्दृष्ट्वा शोकः समुपादितः तेन शोकेन श्लोकमेकमागतम्॥ ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत।

- **ततः करुणवेदित्वादधर्मो यमिति द्विजः ।**

**निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ।**

तव नरकप्राप्तिः निश्चितः मिथुनरतं क्रौञ्चं हतः इति। इतिहासस्य रामयणस्य आरम्भस्य कारणमेकः क्रोञ्चपक्षी अभवत् । पुण्यश्लोकस्य श्रीरामचन्द्रस्य आदर्शभूतस्य एतस्य श्रणं पुण्यं कार्यं भवति

- **मा निषाद प्रतिष्टां त्वमगमः शाश्वतीं समाः ।**

**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।15।2 स.।रा।**

इत्थं शोकमेव श्लोकः भवतु इति अकथयत् शिष्यय भ्रद्वाजाय वाल्मीकिः।

- **पादबद्धो क्षर समस्तन्त्रीलयसमन्वितः ।**

**शोकार्तस्य मे प्रवृत्तो श्लोको भवतु नान्यथा।18 । रा**

पक्षी तावत् लघुः , तस्य शक्तिः आधिका । एकस्य काव्यस्य कारणिभूता भवितुम् अर्हति इत्यवगम्यते ।

कालिदासविरचित रघुवंशकाव्ये दिलीपमहाराज्ञः सन्तानविहीनस्य सन्तानाय कारणीभूता अभवत् कामधेनोः पुत्री नन्दिनी। गुरुवसिष्ठस्य आदेशत् दिलीपः सन्तानहीनस्य कारणं पृच्छति। तदा सः इत्थम् अधो निर्दिष्टमुत्तरं अददात्। अनेन पशुभूत्वा अपि वरदानस्य सामर्थ्यं अस्तीति अवगन्तुं शक्नुमः ।

- **सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं सुचिः ।**

**भुवं कोष्णेन कुण्डोध्नी मेध्येनाभृथादपि ।**

**प्रस्नवेनाभिवर्षन्ति वत्सालोकप्रवर्तिना ॥84।**

रघु च नन्दिनी स्वस्य पुत्रं दृष्ट्वा स्रवति क्षीरम् पुत्रस्नेहस्य पराकाष्टः अभवत् **।**

परिसमाप्तिः - साहित्येषु मृगाणां पक्षीणां च मनुष्यैः सह स्नेहसम्बन्धः श्लाघनीयः । मृगपक्षीणां विषये अस्माकं आदरः आवश्यकः । तस्य रक्षणेन प्रकृतेः समतोलनं भवति। परोपकारं विना त्यागजिवने सुखं न प्राप्नुमः।

**सन्दर्भग्रन्थसूची**


१ नैषधीयचरितम् **-** चौखम्बा संस्कृत प्रतिष्ठनम् – श्रीमन्नारायणः ।

२ अभिज्ञानशाकुन्तलम् – महाकविकालिदासप्रणीतम् – चौखम्बा सुरभारती प्रकाशन ।

३ ऋतुसंहारम् - महाकविकालिदासप्रणीतम् -मोतिलाल् बनरसिदास् ।

४ रघुवंशकाव्यम् - चौखम्बा -संस्कृत प्रतिष्ठन - श्रीहरगोविन्दमिश्रः ।

६. रामायणम् - श्रीमद्वाल्मीकिरामायणम् (मूलमात्रम्) – गीताप्रेस् गोरख्पुर्।

७. मेघदूतकाव्यम्- महाकविकालिदासप्रणीतम् - गीताप्रेस् गोरख्पुर।